**वर्णु** पु० वर्ण-उन् । १नदभेदे उणादि० २आदित्ये संक्षिप्त०।

**वर्त्तक** पु० वृत-ण्वुल् । (भारुइ) १पक्षिभेदे वर्त्तकाशब्दे । २अश्वस्य खुरे च अमरः । ३वर्त्तलौहे न० हेमच०।

**वर्त्तन** न० वृत-ल्युट् । १वृत्तौ २स्थितौ अमरः । णिच्-भावे ल्युट् । २स्थापने णिच् करणे ल्युट् । ३जीवनोपाये स्त्री ङीप् । ४तर्कुपीठे न० मेदि० । ल्यु । ६वृत्तिमति वर्त्तिष्णौ च त्रि० अमरः । ७वामने त्रि० मेदि० । ८साधारणवर्त्तुले न० शब्दर० ।

**वर्त्तनी** स्त्री वर्त्यते पादावत्र वृत-णिच् आधारे ल्युट् । १पथि २पेषणे शब्दर०। पृषो० ह्रस्वः पूर्वदेशे त्रिका० ।

**वर्त्तमान** पु० वृत-शानच् । कालभेदे शब्दप्रयोगाधारे आरब्धापरिसमाप्ते १काले २तत्कालवृत्तौ त्रि० ।

वर्त्तमानकालश्च चतुर्विधः । यथा “प्रवृत्तोपरत१-श्चैव वृत्ताविरत२ एव च । नित्यः प्रवृत्तः३ सामीप्यो४ वर्त्तमानश्चतुर्विधः । क्रमेणोदाहरणानि । मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयतीत्यर्थः । इह कुमाराः क्रीडन्ति २तदानीन्तनक्रीडनाभावेऽपि पूर्वक्रीडानां बुद्धौ वर्त्तमानत्वात् । पर्वतास्तिष्ठन्ति ३नित्य प्रवृत्तत्वात् । किन्तु पर्वतानां स्थितत्वेन वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात् । सामीप्यो४ द्विविधः । भूत सामीप्यो भविष्यत्सामीप्यश्च यथा कदा आगतोऽसि इतिप्रश्ने अध्वखेदादेर्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति । भविष्यत्सामीप्यो यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमने क्रियमाणोद्यमोऽपि वदति” दुर्गादासः ।

**वर्त्तरूक** पु० १नदीभेदे २काकोलीभेदे ३जलावर्त्ते मेदि० । ४द्वारपाले त्रिका०। [आवर्त्तनयोग्ये लौहभेदे ।

**वर्त्तलौह** न० वर्त्यते वृत-णिच्-कर्मणि अच् कर्म० ।

**वर्त्ति(र्त्ती)** स्त्री वृत-इन् वा ङीप् । १लेखे २नयनाञ्जने ३गात्रानुलेपने ४दीपदशायां ५भिषजां निर्मेयौषधभेदे (वाति) “कतकस्य फलं शङ्खः सैन्धवं त्र्यूषणं वचा । फेणो रसाञ्जनं क्षौद्रं विडङ्गानि मनःशिला । एषां वर्त्तिर्हन्ति काचं तिमिरं पटलं तथा” गरुड़पु०१९८अ०। ६दीपे च मेदि० ।

**वर्त्तिक** पुंस्त्री वृत-तिकन् । (वटेर) १विहगभेदे राजनि० स्त्रियां ङीष् । वर्त्मनि वर्त्तते वृत-अच् वर्त्तः तत्र साधुः हितो वा ठन् । (भारुइ) २खगे अमरः । ३अजशृङ्ग्यां स्त्री० राजनि० ४दीपदशायां स्त्री सा च पञ्चविधा यथा “पद्मसूत्रभवा दर्भगर्भसूत्रभवाऽथ वा । शाणजा बादरी वापि फलकोशोद्भवाथ वा । वर्त्तिकादीपकृत्येषु सदा पञ्चविधा स्मृता” कालिकापु०६८अ० ।

**वर्त्तिन्** त्रि० वृत-णिनि । वर्त्तनशीले ।

**वर्त्तिष्णु** त्रि० वृत-इष्णुच् । वर्त्तनशीले ।

**वर्त्तिष्यमाण** पु० वृत-शानच् लृटः सद्वेति स्यट् । भविष्यत्काले । २तद्वृत्तौ त्रि० ।

**वर्त्तुल** त्रि० वृत-उलच् । १गोलाकारे पदार्थे अमरः । २गृञ्जने न० राजनि० । ३कलायभेदे पु० शब्दमा० । ४तर्कुपीठ्याम् स्त्री हारा०५गजपिप्पल्याम् स्त्री राजनि० ङीप् ।

**वर्त्मन्** न० वृत-मनिन् । १पथि अमरः २आचारे “आ मनोर्वर्त्मनः” रघुः ३नेत्रच्छदे च मेदि०। अस्थिशब्दे ४५पृ० दृश्यम्। वर्त्मलक्षणं तद्गतरोगभेदाश्च सुश्रुते उक्ता यथा

“द्व्यङ्गुलं सर्वतः सार्द्धं भिषग्नयनबुद्बुदम् । सुवृत्तं गोस्तनाकारं सर्वभूतगुणोद्भवम् । पलं भुवोऽग्नितो रक्तं वातात्कृष्णं सितं जलात् । आकाशादश्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे । दृष्टिञ्चात्र तथा वक्ष्ये यथा ब्रूयाद्विशारदः । नेत्रायामत्रिभागन्तु कृष्णमण्डलमुच्यते । कृष्णात् सप्तममिच्छन्ति दृष्टिं दृष्टिविशारदाः । मण्डलानि च सन्धींश्च पटलानि च लोचने । यथाक्रमं विजानीयात् पञ्चषट् च षडेव च । पक्ष्मवर्त्मश्वेतकृष्ण०दृष्टीनां मण्डलानि तु । अनुपूर्वन्तु ते मध्यास्त्वारोऽन्त्या यथोत्तरम् । पक्ष्मवर्त्मगतः सन्धिर्वर्त्मशुक्लगतोऽपरः । शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोऽपरः । ततः कनीनकगतः षष्ठश्चापाङ्गगः स्मृतः । द्वे वर्त्मपटले विद्याच्चत्वार्य्यन्यानि चाक्षिणि । जायन्ते तिमिरं येषु व्याधिः परमदारुणः ।”

“पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः । सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः । विवर्द्ध्य-मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान् । विकाराञ्जनयन्त्याशु नामतस्तान्निबोधत । उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा । तथार्शोवर्त्म शुष्कार्शस्तथैवाञ्जननामिका । बहलं वर्त्म यच्चापि व्याधिर्वर्त्मावबन्धकः । क्लिष्टकर्दमवर्त्माख्यौ श्याववर्त्म तथैव च । प्रक्लिन्नमपरिक्लिन्नं वर्त्म वातहतन्तु यत् । अर्बुदं निमिषश्चापि शोणितार्शश्च यत्कृतम् । लगणो विसनामा च